स्मरकूपिका, स्त्री, योनिः । स्मरकूपकशब्दादाप्-प्रत्ययेन निष्पन्ना ॥

स्मरगुरुः, पुं, (स्मरस्य गुरुः पिता । कृष्णावतारे प्रद्युम्नजनकत्वात् तथात्वम् ।) विष्णुः । इति केचित् ॥

स्मरगृहं, क्ली. ( स्मरस्य गृहम् । ) योनिः । इति जटाधरः ॥

स्मरचक्रः, पुं, ( स्मरस्य चक्रमिव आकृतिर्यस्य । ) रतिबन्धविशेषः । यथा, स्मरदीपिकायाम् ।

"धृत्वा वामकरेणोरुं स्वपादस्योपरिस्थितम् ।
हृदृश्च रमते कामी स्मरचक्रप्रकीर्त्तितः ॥"

स्मरच्छत्रं, क्ली, ( स्मरस्य छत्रमिव । ) योनिः । इति केचित् ॥

स्मरणं, क्ली, (स्मृ + ल्युट् ।) स्मृतिः । तत्पर्य्यायः । आध्यानम् २ स्मृतिः ३ । इति हेमचन्द्रः ॥ चिन्ता ४ चर्चा ५ । इति जटाधरः ॥ (यथा, कुमारे । ६ । १८ ।

"सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात् तव ॥"

अलङ्कारविशेषः । यथा, साहित्यदर्पणे । १० । ६६८ ॥

"सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते ।"

यथा,—

"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम् ।
स्मरामि वदनं तस्याश्चारु चञ्चललोचनम् ॥"

"मयि सकपटमित्यादौ च" स्मृतेः सादृश्यानुभवं विनोत्थापितत्वान्नायमलङ्कारः । राघवानन्दमहापात्रास्तु वैसादृश्यात् स्मृतिमपि स्मरणालङ्कारमिच्छन्ति । तत्रोदाहरणं तेषामेव यथा,—

"शिरीषमृद्वी गिरिषु प्रपेदे
यदा यदा दुःखशतानि सीता ।
तदा तदास्याः सदनेषु सौख्य-
लक्षाणि दध्यौ गलदश्रु रामः ॥"

स्मरणापत्यतर्पकः, पुं, ( स्मरणेन अपत्यं तर्पयतीति । तृप + ण्वुल् । ) कच्छपः । इति केचित् ॥

स्मरदशा, स्त्री, ( स्मरस्य दशा । ) कामावस्था । तद्दशविधा यथा, उज्ज्वलनीलमणिः ।

"नयनप्रीतिः प्रथमं चिन्तासङ्गस्ततोऽथ
सङ्कल्पः ।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ।
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव
स्युरित्याचक्षते ॥"

स्मरध्वजं, क्ली, (स्मरस्य ध्वजमिव ।) योनिः । इति शब्दरत्नावली ॥

स्मरध्वजः, पुं, ( स्मरस्य ध्वज इव । ) वाद्यम् । इति हेमचन्द्रः ॥ लिङ्गम् । इति केचित् ॥

स्मरध्वजा, स्त्री, ( स्मरस्य ध्वजो गर्व्वो यया ) ज्योत्स्नारात्रिः । इति केचित् ॥

स्मरप्रिया, स्त्री, ( स्मरस्य प्रिया । ) रतिः । इति जटाधरः ॥

स्मरमन्दिरं, क्ली, ( स्मरस्य मन्दिरम् । ) योनिः । इति हेमचन्द्रः ॥

स्मरलेखनी, स्त्री, (स्मरस्य लेखनीव ।) शारिकापक्षी । इति शब्दरत्नावली ॥

स्मरवल्लभः, पुं, ( स्मरस्य प्रद्युम्नस्य वल्लभः । ) अनिरुद्धः । इति केचित् ॥

स्मरवीथिका, स्त्री, ( स्मरस्य वीथिका । ) वेश्या । इति राजनिर्घण्टः ॥

स्मरवृद्धिसंज्ञः, पुं, ( स्मरस्य वृद्धिर्यस्मात् स स्मरवृद्धिः । स एव संज्ञा यस्य । ) कामवृद्धिक्षुपः । इति राजनिर्घण्टः ॥

स्मरसखः, पुं, ( स्मरस्य सखा । समासे टच् । ) चन्द्रः । इति केचित् ॥ ( स्मरस्य उद्दीपके, त्रि । यथा, रघुः । ८ । ३६ ।

"पतिषु निर्व्विविशुर्मधुमङ्गनाः
स्मरसखं रसखण्डनवर्ज्जितम् ॥")

स्मरस्तम्भः, पुं, ( स्मरस्य स्तम्भ इव । ) उपस्थः । इति शब्दरत्नावली ॥

स्मरस्मर्य्यः, पुं, ( स्मरः स्मर्य्यो यस्य । ) गर्द्दभः । इति त्रिकाण्डशेषः ॥

स्मरहरः, पुं, ( स्मरं हरति नाशयतीति । हृ + हरतेरनुद्यमने अच् । ) शिवः । इत्यमरः । १ । १ । ३५ ॥

स्मरागारं, क्ली, ( स्मरस्य आगारम् । ) भगम् । इति शब्दरत्नावली ॥

स्मराङ्कुशः, पुं, ( स्मरस्य अङ्कुश इव । ) नखम् । इति शब्दरत्नावली ॥

स्मराम्रः, पुं, (स्मरोद्दीपक आम्रः । ) राजाम्रः । इति राजनिर्घण्टः ॥

स्मरासवः, पुं, (स्मरस्य आसव इव । ) लाला । यथा,—

"स्मरासवो मखसरःपारि स्यात् पानभाजनम् ।"
इति त्रिकाण्डशेषः ॥

मद्यभेदः । इति केचित् ॥

स्मार्त्तं, क्ली, ( स्मृतेरिदम् । स्मृति + अण् । ) स्मृतिशास्त्रोक्तकर्म्म । यथा,—

"श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत् ।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः ॥"
इति तिथ्यादितत्त्वम् ॥

अपि च ।

"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता ॥"
इति आह्निकतत्त्वम् ॥

स्मार्त्तः, त्रि, ( स्मृतेरिदमिति । अण् । ) स्मृतिसम्बन्धीयः । ( यथा, मनुः । १ । १०८ ।

"आचारः परमो धर्म्मः श्रुत्युक्तः स्मार्त्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान्
द्विजः ॥")

स्मृतिशास्त्रव्यवसायी । स्मृतिशब्दात् अण्प्रत्ययेन निष्पन्नः ॥

स्मि, क ङ अनादरे । इति कविकल्पद्रुमः ॥ ( चुरा०-आत्म०-सक०-अनिट् । ) दन्त्यादिः । क ङ, स्माययते । इति दुर्गादासः ॥

स्मिट, क अनादरे । स्नेहे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सक०-सेट् । ) ओष्ठ्यवर्गशेषयुक्तः । क, स्मेटयति । इति दुर्गादासः ॥

स्मितं, क्ली, ( स्मि ङ ईषद्धसनम् + क्तः । ) ईषद्धास्यम् । इत्यमरः । १ । ७ । ३४ ॥ ( यथा, महाभारते । १ । १५३ । २२ ।

"विलज्जमानेव लता दिव्याभरणभूषिता ।
स्मितपूर्व्वमिदं वाक्यं भीमसेनमथाब्रवीत् ॥"

विकसिते, त्रि । इति त्रिकाण्डशेषः ॥ ( यथा, माघे । ६ । ५४ ।

"स्मितसरोरुहनेत्रसरोजला-
मतिसिताङ्गविहङ्गहसद्द्विवम् ॥" )

स्मील, निमेषणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् । ) ओष्ठ्यवर्गशेषयुक्तः । स्मीलति चक्षुः पक्ष्मभिरावृतं स्यादित्यर्थः । इति दुर्गादासः ॥

स्मृ, स्मृतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-अनिट् । ) स्मरति । स्मृतिर्ज्ञानविशेषः । तथा च ।

"सम्विद्भगवती द्वेधा स्मृत्यनुभवभेदिका ॥"
इति तार्किकाः ॥

तेन ज्ञो अजन्तकर्त्तुः कर्म्मत्वम् । गुरुः शिष्यं शास्त्रं स्मारयति । इति दुर्गादासः ॥

स्मृ, म औत्क्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सक० इति केचित्-अनिट् । ) म, स्मरयति । उत्कः उत्कण्ठितः तस्य भावः औत्क्यमुत्कण्ठा । आध्याने इति प्राञ्चः । आ समन्तात् ध्यानमाध्यानं इति कश्चित् । उत्कण्ठिका इति काशिकावृत्तिवोपदेवौ । उत्कण्ठापूर्व्वकं स्मरणमिति वृद्धाः । मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमिति किराते । इति दुर्गादासः ॥

स्मृतः, त्रि, ( स्मृ + क्तः । ) स्मृतिविषयः । कृतस्मरणः । यथा,—

"आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥"
इति मलमासतत्त्वम् ॥

स्मृतिः, स्त्री, ( स्मृ + क्तिन् । ) अनुभूतविषयज्ञानम् । इति चण्डीटीकायां नागोजीभट्टः ॥ स्वाम्याश्रितक्रियाजन्यसंस्कारजन्यज्ञानम् । इति रसमञ्जरी ॥ अनुभव-संस्कार-जन्य-ज्ञानम् । यथा,—

"सम्विद्भगवती द्वेधा स्मृत्यनुभवभेदिका ॥"
इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

किञ्च ।

"विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा
मता ।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्व्विधा ॥"
इति भाषापरिच्छेदः